**दिनाङ्क :- 16.07.2026**
**प्रात: - 06:55**

## अथवार्ताः

### मन्त्रिमण्डलस्य निर्णयाः

केन्द्रीयमन्त्रिमण्डलेन भारतस्य 'सेमिकण्डक्टर' इति परिकल्पना-निर्माणपरिवेशं सुदृढीकर्तुं ञ्चशताधिक-सप्तविंशति-सहस्राधिकैकलक्ष-कोटि-रूप्यकाणां विनियोगेन सेमिकॉन् - 2.0 इत्येषा योजना अनुमोदिता। नवदिल्ल्यां ह्यः वार्ताहरान् सम्बोधयन् सूचना-प्रसारणमन्त्री अश्विनी-वैष्णवः एतान् मन्त्रिमण्डलनिर्णयान् उद्घोषितवान्। असौ अवदत् यत् 'सेमिकॉन्–1.0' इति योजनायाः सफलताम् अनुवर्तमाना एषा योजना भारतं वैश्विकं 'सेमिकण्डक्टर' इति केन्द्रं स्थापयितुं प्रशासनस्य दृढप्रतिबद्धतां द्योतयति। मन्त्रिमण्डलेन पञ्चशताधिक-द्विषष्टिसहस्र-कोटि-रूप्यकाणां विनियोगेन चलदूरभाष-विनिर्माणयोजना अपि अनुमोदिता। एवमेव उत्तरप्रदेशस्य वाराणसी-नगरे मार्गसंयोजनस्य सुदृढीकरणाय, यातायातावरोधस्य न्यूनीकरणाय, यात्रासमयस्य च सङ्क्षेपणाय द्वे उन्नतमार्गपरियोजने अपि अनुमोदिते।

### भारत-यूरोपीयसङ्घस्य व्यापार-प्रौद्योगिकी-परिषदः उपवेशनम्

विदेशमन्त्री डॉ एस्. जयशङ्करः विश्वासं व्यक्तवान् यत् भारत-यूरोपीयसङ्घयोः व्यापार-प्रौद्योगिकी-परिषदः उपवेशनेन द्वयोः पक्षयोः सहकार्यं अधिकं सुदृढं भविष्यति। ब्रुसेल्स-नगरे सम्पन्नस्य तृतीय-भारत-यूरोपीयसङ्घ-व्यापार-प्रौद्योगिकी-परिषदः उपवेशनस्य अनन्तरं वार्ताहरान् सम्बोधयन् असौ अवदत् यत् भारत-यूरोपीयसङ्घयोः मध्ये मुक्तव्यापारसन्धिः, सुरक्षा-रक्षासहकारः अथ गमनागमनरूपरेखा इत्येतेषां माध्यमेन विकसितः सहयोगः अग्रेऽपि प्रवर्धिष्यते।

केन्द्रीयवाणिज्योद्योगमन्त्री पीयूषगोयलः भारत-यूरोपीयसङ्घयोः मुक्तव्यापारसन्धिं निष्पक्षं, न्यायसङ्गतं सन्तुलितं च निरूप्य अवदत् यत् एषः सन्धिः उभयदेशयोः सर्वेषां क्षेत्राणां कृते परस्परहितकरः भविष्यति।

### निर्वाचनायोगः - विशेषगहनपुनरीक्षणकार्यक्रमः

भारतीयनिर्वाचनायोगेन पञ्जाब-कर्नाटक-तेलङ्गाना-दिल्ली इत्येतेषु नगरेषु प्रचलितस्य मतदातृसूच्याः विशेषगहन-पुनरीक्षणकार्यक्रमस्य समयसीमा विस्तारिताऽस्ति। दिल्ली-कर्नाटकयोः मतदानकेन्द्रस्तरीयाधिकारिभिः प्रतिगृहं गत्वा क्रियमाणं सत्यापनकार्यं, यत् अस्य मासस्य नवविंशति-दिनाङ्कपर्यन्तम् निर्धारितम् आसीत्, अधुना आगामिमासस्य अष्टमदिनाङ्कपर्यन्तम् प्रवर्तिष्यते। पञ्जाब-तेलङ्गाना इत्येतयोः तु प्रतिगृहं गत्वा सत्यापनकार्यं आगामिमासस्य तृतीयदिनाङ्कपर्यन्तम् एव अनुवर्तिष्यते।

### पुरी-रथयात्रा

विश्वविख्याता पुरी-रथयात्रा अद्य ओडिशाराज्यस्य पुरी-नगरे भगवतः जगन्नाथस्य, तस्य ज्येष्ठभ्रातुः बलभद्रस्य अनुजायाश्च देव्याः सुभद्रायाः सह आरभ्यते। अस्यां वार्षिकरथयात्रायां भगवान् जगन्नाथः स्वभ्रात्रा भगिन्या च सह रथेषु समारुह्य भक्तेभ्यः दर्शनं दास्यति। पुरी-श्रीमन्दिर-प्रशासनेन अस्मिन् वर्षे रथयात्रायां बृहद्सङ्ख्यायां भक्तजनानाम् उपस्थितेः अपेक्षा व्यक्ता। यात्रायाः निर्विघ्नसम्पादनार्थं बहुस्तरीया सुरक्षा-व्यवस्था सुदृढीकृता अस्ति।

### फीफा

फीफा-विश्वचषक-फुट्बॉल्-स्पर्धायाः द्वितीय-उपान्त्यचक्रे अर्जेण्टीनादलम् अमेरिकादेशस्य अटलाण्टा-क्रीडाङ्गणे इङ्ग्लैण्डदलं द्वि-एक इत्यङ्कान्तरालेन पराजित्य निर्णायकचक्रे प्रवेशम् अकरोत्। अधुना जुलाई-मासस्य नवविंशति-दिनाङ्के निर्णायकचक्रे अर्जेण्टीनादलं स्पेनदलं सम्मुखीकरिष्यति।

## क्रिकेट्

भारत-इङ्ग्लैण्डदेशयोः मध्ये त्रि-एकदिवसीय-शृङ्खलायाः द्वितीया स्पर्धा अद्य कार्डिफ्-नगरस्य सोफिया-गार्डन्स्-क्रीडाङ्गणे भविष्यति। इयं स्पर्धा भारतीयसमयानुसारं सायं सार्धपञ्चवादने आरभ्यते। इतः प्राक् बर्मिङ्घम-नगरस्य एजबेस्टन्-क्रीडाङ्गणे आयोजिते प्रथम-एकदिवसीय-द्वन्द्वे भारतेन इङ्ग्लैण्डदलम् षड्स्तोभैः पराजितम् आसीत्। शृङ्खलायाः तृतीयः अन्तिमश्च एकदिवसीय-द्वन्द्वः रविवासरे लण्डन्-नगरस्य लॉर्ड्स्-क्रिकेट्-क्रीडाङ्गणे भविष्यति।

**।। इति वार्ता:।।**